पञ्चदशः पाठः १५

# स्वच्छं भारतम्

**पात्रपरिचयः**

| | | |
|---|---|---|
| लोकेशः | – | गृहस्वामी |
| सन्ध्या | – | लोकेशस्य पत्नी |
| शुचिः | – | लोकेशस्य पुत्री |
| श्रीशः | – | लोकेशस्य पुत्रः |
| कौस्तुभः | – | श्रीशस्य मित्रम् |
| यशवर्धनः | – | लोकेशस्य पिता |
| वन्दना | – | यशवर्धनस्य पत्नी, लोकेशस्य माता |
| रचना | – | शुच्याः सखी |

(स्वमित्राभ्यां रचनाकौस्तुभाभ्यां सह शुचिश्रीशौ विद्यालयात् गृहम् आगच्छतः। आलिन्दे यशवर्धनः आसन्दे उपविष्टः)

**शुचिश्रीशौ** – प्रणमावः पितामह! (सर्वे प्रणमन्ति)

**यशवर्धनः** – आयुष्मान् भव। (रचनाकौस्तुभौ प्रति) एतौ कौ ?

**श्रीशः** – एषः मम मित्रं कौस्तुभः।

**शुचिः** – एषा च मम सखी रचना।

**वन्दना** – (प्रविश्य) भोः! विद्यालयात् विलम्बः किमर्थम् ?




**श्रीशः** – अद्य विद्यालये स्वच्छताकार्यक्रमः आसीत्।

**यशवर्धनः** – प्रतिदिवसं विद्यालये स्वच्छता न भवति किम् ?

**कौस्तुभः** – भवति किन्तु अद्य अभियानरूपेण

विद्यालयात् बहिः अपि सार्वजनिकेषु स्थानेषु छात्राणां समूहं निर्माय स्वच्छतां कृतवन्तः।

**वन्दना** – अस्मिन् विषये सर्वान् छात्रान् कः प्रेरितवान् ?

**रचना** – अस्माकं प्रधानाचार्यः उद्बोधितवान् ?

**लोकेशः** – (प्रविश्य) अरे किं प्रचलति अत्र ?

**यशवर्धनः** – (विहस्य) विद्यालयस्य स्वच्छताविषयकं संस्मरणं श्रावयन्ति।

**लोकेशः** – (आसन्दे उपविश्य) अहमपि श्रोतुम् इच्छामि, श्रावयन्तु।

**कौस्तुभः** – पितृव्य! प्रधानाचार्यः बोधितवान् यत् अस्माकं देशे "स्वच्छताभियानम्" प्रचलति।




**शुचिः** – अपि च सः उक्तवान् यद् अस्माकं गृहस्य स्वच्छता तु करणीया एव सार्वजनिकस्थानेषु बसस्थाने, उद्याने, चिकित्सालये अपि स्वच्छतायाः अस्माकं दायित्वम्।

**लोकेशः** – केवलं दायित्वं वा आचरणीयम् ?

**श्रीशः** – भोः पितः! अद्य तु वयं समूहे तत्र गत्वा स्वच्छतां कृतवन्तः।

**यशवर्धनः** – (हसन्) लोकेश! बालकाः प्रबुद्धाः अभवन्।

**वन्दना** – अरे एतत् तु अस्माकं प्रधानमन्त्रिमहोदयस्य चमत्कारोऽस्ति।

**लोकेशः** – आम्! तेन प्रेरिताः सर्वे नेतारः अधिकारिणः नागरिकाश्च एतस्मिन् कार्ये प्रवृत्ताः सन्ति। मम कार्यालयेऽपि सर्वे .............।

**शुचिः** – (मध्ये एव) दूरदर्शने अपि शौचालयनिर्माणविषये विज्ञापनम् आगच्छति।

**कौस्तुभः** – ये निर्धनाः सन्ति ते स्वगृहे शौचालयनिर्माणं कथं करिष्यन्ति।

**लोकेशः** – तेषां कृते सर्वकारः आर्थिकसहयोगं करोति।

**रचना** – अस्मिन् वर्षे अस्माकं विद्यालयेऽपि शौचालयानां निर्माणम् अभवत्।

**सन्ध्या** - (अल्पाहारम् आदाय प्रविश्य) विद्यालये परिश्रमं कृत्वा आगतवन्तः अतः अल्पाहारेण सह वार्तालापं कुर्वन्तु।

**शुचिः** - (अल्पाहारं कुर्वन्) आपणे पूर्वं सर्वे चायं पीत्वा अवकरम् इतस्ततः क्षिपन्ति स्म, किन्तु इदानीं सर्वकारेण अवकरपात्राणि स्थापितानि तत्र अवकरपात्रेषु अवकरं स्थापनीयम्।



**श्रीशः** - इदानीं तु चायचषकान् मह्यं ददतु। अहमेव मार्जयामि।

**सन्ध्या** - (आश्चर्येण) अहो! शोभनम् शोभनम्।

**वन्दना** - सन्ध्ये! अद्य प्रभृतिः एते बालकाः गृहकार्येषु अपि साहाय्यं करिष्यन्ति इति चिन्तयामि।

**शुचिः** - आम् पितामहि! अस्माकं प्रधानाचार्या अपि स्वगृहे स्वच्छतादीनि कार्याणि करोति।

**यशवर्धनः** - भवत्याः प्रधानाचार्या एव न अस्माकं राष्ट्रपितामहात्मागान्धीः अपि साबरमती आश्रमे स्वयमेव स्वच्छताकार्यं करोति स्म। कर्मकरेषु आश्रितः नासीत्।

**लोकेशः** - सः तु अस्माकं प्रेरणापुरुषः अस्ति।

**रचना** - वयम् अपि विद्यालये प्रतिज्ञां कृतवन्तः यत् अस्माकं परिवेशं स्वच्छं करिष्यामः।

**सन्ध्या** - वयं गृहजनाः अपि प्रतिज्ञां करवाम यत् वयम् अस्माकं गृहं, कार्यालयं, चिकित्सालयं, धार्मिकस्थलानि, उद्यानानि, सार्वजनिकस्थलानि च स्वच्छं करवाम। तत्र अवकरम् इतस्ततः न क्षिपाम। येन अस्माकं देशः सुन्दरः नागरिकाः च स्वस्थाः भवन्तु।

**सर्वे** - आम्। सर्वे प्रतिज्ञां करवाम।

**(सर्वे प्रतिज्ञां कुर्वन्ति)**

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| आलिन्दे | कक्षात् बहिः आच्छादितः भागः | बरामदा |
| उद्बोधितवान् | विज्ञापितवान् | बताया |
| दायित्वम् | कर्तव्यम् | कर्तव्य |
| पितृव्यः | पितुः भ्राता | काका, ताऊ |
| प्रबुद्धाः | जागरुकाः | सचेत |
| प्रेरिताः | बोधिताः | प्रेरित किये गये |
| प्रवृत्ताः | संलग्नाः | लग गये |
| अवकरम् | अपशिष्टम् | कचरा |
| आपणम् | वस्तूनां क्रयविक्रय स्थानम् | बाजार/दुकान |
| चषकम् | चायपात्रम् | प्याला |
| कर्मकरेषु | कर्मचारिषु | कर्मचारियों पर |
| परिवेशम् | वातावरणम् | वातावरण |
| जवनिका | प्रावारकवस्त्रम् | पर्दा |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत -**

स्वच्छता संस्मरणम् श्रावयन्तु प्रबुद्धाः सर्वकारः
अवकरपात्राणि प्रभृतिः इतस्ततः उद्बोधितवान्।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत -**

(क) विद्यालये कः कार्यक्रमः आसीत् ?
(ख) अस्माकं प्रधानाचार्यः किम् उद्बोधितवान् ?
(ग) समूहे कुत्र गत्वा छात्राः स्वच्छतां कृतवन्तः ?
(घ) केन प्रेरिताः सर्वे नेतारः स्वच्छताकार्ये प्रवृत्ताः सन्ति ?
(ङ) अस्माकं देशे किम् अभियानं प्रचलति ?

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एक पदेन लिखत –**

(क) के प्रबुद्धाः अभवन् ?

(ख) निर्धनानां शौचालयनिर्माणार्थं कः आर्थिकं सहयोगं करोति ?

(ग) छात्राः कुत्र परिश्रमं कृत्वा आगतवन्तः ?

(घ) चायं पीत्वा जनाः अवकरं कुत्र क्षिपन्ति ?

(ङ) बालकाः गृहकार्येषु किं करिष्यन्ति ?

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकवाक्ये लिखत –**

(क) चायं पीत्वा अवकरं कुत्र स्थापनीयम्?

(ख) महात्मागान्धीः कुत्र स्वच्छताकार्यं करोति स्म?

(ग) अस्माकं परिवेशः कथं स्वच्छं भविष्यति?

(घ) देशस्य नागरिकाः स्वस्थाः कथं भवेयुः?

(ङ) सार्वजनिकेषु स्थानेषु स्वच्छतां करणाय के समूहं कृतवन्तः?

**३. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –**

| प्रधानाचार्यः, सर्वकारः, मम, कर्मकरेषु, प्रबुद्धा, स्वच्छता |
|---|

(क) एषः ................................................ मित्रं कौस्तुभः।

(ख) अद्य विद्यालये .................................. कार्यक्रमः आसीत्।

(ग) अस्माकं ............................................. उद्बोधितवान्।

(घ) तेषां कृते ....................................... आर्थिकसहयोगं करोति।

(ङ) ................................................ आश्रितः न आसीत्।

**४. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत –**

(क) <u>मम</u> मित्रं कौस्तुभम्

(ख) <u>विद्यालयस्य</u> स्वच्छताविषयकं संस्मरणं श्रावयन्ति ।

(ग) <u>तेन</u> प्रेरिताः सर्वे नेतारः ।

(घ) <u>सर्वकारः</u> आर्थिकसहयोगं करोति ।

(ङ) <u>चायचषकान्</u> मह्यं ददतु ।

५. **अधोलिखितानां पदानां प्रकृतिप्रत्ययं पृथक् कुरुत -**

| पदम् | प्रकृतिः | | प्रत्ययः |
|---|---|---|---|
| (क) श्रोतुम् | .......................... | + | ..........................। |
| (ख) उपविश्य | .......................... | + | ..........................। |
| (ग) उक्तवान् | .......................... | + | ..........................। |
| (घ) गत्वा | .......................... | + | ..........................। |
| (ङ) आदाय | .......................... | + | ..........................। |
| (च) कृत्वा | .......................... | + | ..........................। |
| (छ) बोधितवान् | .......................... | + | ..........................। |

६. **अधोलिखितानां पदानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) मम | ................. | ................. | ................. |
| (ख) विद्यालयात् | ................. | ................. | ................. |
| (ग) स्थानेषु | ................. | ................. | ................. |
| (घ) छात्रान् | ................. | ................. | ................. |
| (ङ) शुच्याः | ................. | ................. | ................. |
| (च) अस्माकम् | ................. | ................. | ................. |
| (छ) मह्यम् | ................. | ................. | ................. |
| (ज) सर्वकारेण | ................. | ................. | ................. |

## योग्यता-विस्तारः

(क) 'स्वच्छं भारतम्' इति विषयम् आधृत्य भित्तिचित्रनिर्माणं कुरुत ।

(ख) वयमपि सार्वजनिकेषु स्थानेषु स्वच्छताविषयकं सहयोगं कथं कर्तुं शक्नुमः ? लघुलेखं लिखतु ।

(ग) 'नमामि गङ्गे' अभियानस्य प्रेरणया वयं किं कर्तुं शक्नुमः ? सप्तकार्याणां सूचिनिर्माणं करोतु ।

(घ) सप्त सार्वजनिकस्थलानां नामानि लिखत यत्र स्वच्छता आवश्यकी वर्तते ।

(ङ) तेषां सप्तवस्तूनां नामानि लिखत यैः पर्यावरणम् प्रदूषितं भवति ।